Contains Adhyāyas, 10 complete and 11 incomplete. Printed.

No. 16005· तार्किकरक्षाव्याख्या — सारसंग्रहः.

TĀRKIKARAKṢĀVYĀKHYĀ : SĀRASAṄGRAHAḤ.

Substance, palm leaf. Size, 15⅝ × 1 inches. Pages, 144. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Similar to the work described under No. 4199 ante.
Contains the first Paricchēda complete.

Beginning :

नमामि परमात्मानं स्वतः सर्वार्थवेदिनम् ।
विद्यानामादिवक्तारं निमित्तं जगतामपि ॥

प्रारिप्सितस्य ग्रन्थस्य प्रेक्षावदुपादित्साप्रयोजिकामभिमतफलसाधनतामभिधाय श्रोतृबुद्धिमनोनुकूलं वर्तिष्यमाणमेवाग्रे दर्शयति—

निःश्रेयसपदं प्राहुर्येषां तत्त्वावधारणम् ।
प्रमाणादिपदार्थास्ते लक्ष्यन्ते नातिविस्तरम् ॥

येषां प्रमाणादिनिग्रहस्थानान्तानां षोडशपदार्थानां तत्त्वतोऽवधारणमात्यन्तिकदुःखविच्छेदनिःश्रेयसफलत्वेनाक्षचरणपक्षिलमुनिप्रभृतयो वर्णयन्ति; यथा, प्रमाणप्रमेयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानात् निःश्रेयसाधिगम इति न्यायस्यादिमं सूत्रम्; त इदानीं पदार्था लक्ष्यन्ते । समानासमानजातीयव्यवच्छेदकर्मवत्तया प्रदर्श्यन्त इत्यर्थः । ननु चिरन्तननिबन्धनानि तत्र विद्यन्ते । तान्येव शिष्येभ्यो व्याक्रियन्ताम् । किमनेनापूर्वनिर्माणक्लेशेनेत्यत आह—नाति विस्तरमिति ।

End :

तत्र गौणं लाक्षणिकं वार्थमभिप्रेत्य वाक्यप्रयोगो वक्तुरनभिप्रेतमेव मुख्यार्थमारोप्य तदसंभव . . . दूषणाभिधानमुपचारच्छलम् । यथा गङ्गायां घोषः सिंहो देवदत्त इति वा प्रयुक्ते कथं जले घोषवासः कथं देवदत्तः सिंह इति प्रत्यवस्थानम् । अभिधेयोपचारतात्पर्यवृत्तिव्यत्ययेन कल्पितार्थस्य निषेध इति त्रयाणां संक्षेपतो लक्षणम् । छलं द्वितीयादिकक्ष्यादौ संभवति तदुत्तरत्रोदाह्यमिति ।

Colophon:

इति वरदराजविरचिततार्किकरक्षाव्याख्याने सारसंग्रहे प्रथमपरिच्छेदः ॥

The scribe adds—

आनन्दवत्सरे मासि धनुष्यङ्गारके दिवे ।
लिखन् वरदराजीयं शौरिराजोऽष्टमीतिथौ ॥

No. 16006. भागवतम्.
BHĀGAVATAM.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 720. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Same work as that described under No. 2161 ante.

Contains Skandhas 1, 2, 4, 6 to 9, 11 and 12 complete. Printed.

No. 16007. भागवतव्याख्या.
BHĀGAVATAVYĀKHYĀ.

Substance, palm-leaf. Size, 18⅜ × 1⅝ inches. Pages, 534. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

The commentary is called "Munibhāvaprakāśikā."

Same work as that described under No. 2229 ante. By Kṛṣṇaguru.

Contains Skandhas 1, 2 and 3 complete and wants the beginning in the first Adhyāya and breaks off in the 7th Adhyāya in the 4th Skandha. Printed.

Beginning:

तेन इत्यादिना देवशब्दार्थ उक्तः ।
द्योतनस्सर्वदेवानां द्योतमानस्ययं सदा ॥

अज्ञानमखिलमत्रोक्तम् । . द्य खण्डयन् द्योतनः प्रकाशकः जन्मादीत्यनेन . . . . शब्दार्थो दर्शितः । निजजगद्व्यापके . . . तल्लीलेत्था . . . . . त्यादिना भर्गशब्दार्थ भर्गस्तेजस्समाख्यातं भर्जयत्यखिलं कष्टमिति च तत्र ह्युक्तम् । स्वराट् स्वतन्त्रः । प्रेरक . . . . धीप्रबोधनद्योतनं ततोधीपूर्विकाः चेष्टाः प्रेरणं तु प्रचोदनमिति तत्रैवोक्तम् । एवं प्रदर्शितया दिशा प्रचोदनमिति तत्रवोक्तम् । एवं प्रदर्शितया दिशा गायत्र्युपक्रमत्वसिद्धिरनुसन्धेया ।

* * * *

Colophon :

इति श्रीमद्भागवतव्याख्यायां मुनिभावप्रकाशिकासमाख्यायां प्रथमस्कन्धे प्रथमोऽध्यायः ।

End :

Colophon :

इति भागवतव्याख्यायां मुनिभावप्रकाशिकायां तृतीयस्कन्धे त्रयस्त्रिंशोऽध्यायः ।

तृतीयस्कन्धसम्बन्धि . यार्था यदि दीपिका ।
मुनिभावप्रकाशायां रचिता कृष्णसूरिणा ॥

स्वयं मनुकन्या विस्तरेण वक्तुमाह—सोऽस्त्विति ।

* * * *

Colophon :

इति चतुर्थस्कन्धव्याख्यायां षष्ठोऽध्यायः ।

अजेन योऽनुनीतः प्रार्थितो भवस्तेनाभिहितं हे महाबाहो विदुरतो पशुबालानामज्ञानाामघमपराधं न वर्णये च नानुचिन्तये च ।

* * * *

अत्र सत्त्वं सर्वकालसम्बन्धित्वम् । ब्रह्म दिव्यविग्रहस्वरूपमेव न ज्ञायत इत्युच्यमाने तदसहमान इन्द्रः स्वाज्ञानमाविष्कुर्वन्नाह—इदमिति । इदं ते वपुः मनोद्द .

No. **16008** भागवतव्याख्या.

BHĀGAVATAVYĀKHYĀ.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 79. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Same work as that described under No. 2248 ante.

By Appāji Paṇḍita.

Contains the 2nd Skandha and Adhyāyas 91 and 92 of the 10th Skandha.

Beginning :

वरीयानिति । हे नृपलोक · · · · · · प्रश्नः । भगवत्कथाया इति शेषः । पुंसां श्रोतव्यादिषु वर्णाश्रमोचितधर्माणां

श्रवणमननादिषु परः श्रेष्ठः गोचरः, एतत्प्रतिवचनात्मकश्रीभागवतस्य मोक्षादिसर्वाभीष्टप्रदत्वादिति भावः । आत्मवित्संमतः, भगवत्पारतन्त्र्यविद्भिरिष्टः, अतो वरीयान् श्रेष्ठः, ईयसुन्प्रत्ययेन ज्ञापितं प्रश्नौत्कृष्ट्यं तत्प्रतिवचनात्मके पुराणश्रेष्ठे भागवते पर्यवस्यतीति ज्ञेयम् ।

End:

ब्रूहीति । हे सौम्य विदुरस्य बन्धुत्यागनिमित्तं विदुरः पुनः यदैवागतवान् तदिदं विचेष्टितं नः ब्रूहि ।

सूतः—

राज्ञेति । महामुनिः श्रीशुकः राज्ञा परीक्षिता पृष्टः सन् राजप्रश्नानुसारतः यदवोचत् तत् वः अभिधास्ये शृणुत ।

Colophon:

इति द्वितीयस्कन्धान्वय दशमोऽध्यायः ।

स्कन्धः समाप्तः ।

No. **16009.** कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDABRĀHMAṆAM.

Substance, palm-leaf. Size, 17 × 1¼ inches. Pages, 118. Lines, 9 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Same work as that described under No. 145 ante.

Contains the first Aṣṭaka complete. Printed.

No. **16010.** सिद्धान्तकौमुदी.

SIDDHĀNTAKAUMUDĪ.

Substance, palm-leaf. Size, 17¼ × ½ inches. Pages, 124. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Same work as that described under No. 1355 ante.

By Bhaṭṭōjidīkṣita. Printed.

Contains the Samāsaprakaraṇa and Taddhitaprakaraṇa (incomplete).

No. **16011.** कृष्णयजुर्वेदब्राह्मणम्.

KṚṢṆAYAJURVĒDABRĀHMAṆAM.

Substance, palm-leaf. Size, 15½ × 1½ inches. Pages, 162. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Same work as that described under No. 142 ante.

Contains the 3rd Aṣṭaka. Printed.

No. 16012. रामायणव्याख्यानम्—विवेकतिलकम्.
RĀMĀYAṆAVYĀKHYĀNAM : VIVĒKATILAKAM.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 326. Lines, 5 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Same work as that described under R. No. 3409 of the Triennial Catalogue of Sanskrit MSS.

By Varadarāja alias Cōlapaṇḍitabrahmarāja.

Contains the Ayōdhyākāṇḍa (wanting the beginning), Āraṇyakāṇḍa, Kiṣkindhākāṇḍa, Sundarakāṇḍa and Yuddhakāṇḍa (incomplete).

No. 16013. रामायणम्.
RĀMĀYAṆAM.

Substance, palm-leaf. Size, 17 × 1½ inches Pages, 970. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Same work as that described under No. 1806 ante.

Complete. Printed.

No. 16014. गदाधरीयटीका—न्यायरत्नम्.
GADĀDHARĪYAṬĪKĀ : NYĀYARATNAM.

Substance, palm-leaf. Size, 20 × 1 inches. Pages, 175. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Same work as that described under No. 4084 ante.

By Raghunātha.

Contains the Caturdaśalakṣaṇī, Siddhāntalakṣaṇa, Pakṣatā, Avayava and Sāmānyanirukti. Printed.

No. 16015. प्रातिशाख्यम् (यजुस्).
PRĀTIŚĀKHYAM (YAJUS).

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 12. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Prātiśākhyavyākhyā : Tribhāṣyaratna 6*b*.

Same work as that described under No. 928 ante.

Complete. Printed.

The scribe adds—

विरोधिकृद्वत्सरे च श्रावणे गोकुलाष्टमौ ।
श्रीवत्सगोत्रश्रीवासो व्यलिखत् प्रातिशाख्यकम् ॥

No. 16016. प्रातिशाख्यव्याख्यानम्—त्रिभाष्यरत्नम्.

PRĀTIŚĀKHYAVYĀKHYĀNAM : TRIBHĀṢYARATNAM.

Pages, 89. Lines, 12 on a page.

Begins on fol. 6*b* of the MS. described under the last No.

Same work as that described under No. 931 ante.

Almost complete. Printed.

No 16017. सन्ध्यावन्दनमन्त्रवृत्तिः.

SANDHYĀVANDANAMANTRAVṚTTIḤ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 78. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Same work as that described under R. No. 4227(*a*) of the Triennial Catalogue of Sanskrit MSS.

Complete.

No. 16018. रघुवंशम्—सव्याख्यानम्.

RAGHUVAṀŚAM WITH COMMENTARY.

Substance, palm-leaf. Size, 14½ × 1½ inches. Pages, 74. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Same work as that described under Nos. 11686 and 11688 ante.

By Kālidāsa and Mallinātha. Printed.

Breaks off in the 2nd Sarga.

No. 16019. युद्धोपयुक्तमन्त्राः, द्राविडटीकासहिताः.

YUDDHŌPAYUKTAMANTRĀḤ WITH TAMIL ṬĪKĀ.

Substance, palm-leaf. Size, 14½ × 1½ inches. Pages, 8. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Fol. 1 contains some miscellaneous Vedic Mantras.

Begins on fol. 2*a*. The other works herein are Aitarēyabrāhmaṇa 5*a*. Sarpasūkta 11*a*. Rātrisūkta 12*a*. Rāmāvatārarcaḥ 13*a*.

A collection of Vedic hymns intended for recital on occasions of war.

Incomplete.

Beginning :

आत्वाहार्षमन्तरेधि(रभू)र्ध्रुवस्तिष्टावचाचलिः । विशस्त्वा सर्वा वाञ्छन्तु मात्वद्राष्ट्रमधिभ्रशत् ।

* * * *

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अन.विद्धया तथा(न्वा) जयि(य)त्व सत्वा वर्मणो महिमा पिपर्तु ॥

* * * *

धन्वना गा धन्वनाजिं जयेम धन्वना तीव्रास्समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥

End :

आदित्समौशनसं वास्थाय प्रयोधयेदुपश्वासय पृथिवीमुत द्यामित्यृचेन दुन्दुभिमभिमृशेदपसृष्टापरावर्तेतीषून् विसृजेत् । यत्र बाणास्संपतन्तीति युध्यमानेषु जपेत् । संशिष्याद्वा संशिष्याद्वा ।

No. **16020**. ऐतरेयब्राह्मणम्.
AITARĒYABRĀHMAṆAM.

Pages, 11. Lines, 8 on a page.

Begins on fol. 5*a* of the MS. described under the last No.

Same work as that described under No. 32 ante.

Complete. Printed.

No. **16021**. सर्पसूक्तम्.
SARPASŪKTAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 11*a* of the MS. described under No. 16019.

Same work as that described under R. No. 1417 of the Triennial Catalogue of Sanskrit MSS.

Complete. Printed.

No. **16022**. रात्रिसूक्तम्.
RĀTRISŪKTAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 12*a* of the MS. described under No. 16019.

Same text as that described under R. No. 2926 of the Triennial Catalogue of Sanskrit MSS.

Complete. Printed.

No. **16023**. रामावतारर्चः, सव्याख्यः.

RĀMĀVATĀRARCAḤ WITH COMMENTARY.

Pages, 2. Lines, 7 on a page.

Begins on fol. 13*a* of the MS. described under No. 16019.

A compilation of some Vedic hymns which the compiler explains as referring to Śrī Rāma's story.

Incomplete.

Beginning:

भद्रो भद्रया सचमान आगात् स्वसारं जारो अभ्येति पश्चात् ।
सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्रुशद्भिर्वर्णैरभिराममस्थात् ॥

भद्रो रामभद्रः भद्रया मङ्गलरूपया सीतया सचमानः संपद्यमान आ आसमन्तात् आगात् । पितुर्नियोगवशादरण्यमगात् ।

End:

तस्यैवापरा भवति तस्योत्तरा भूयसे शुभवचनाय इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमामदर्शि ।

* * * *

अदो यद्दारु प्लवते सिन्धोः पारे अपूरुषस्तदारभस्तदुर्हणो तेन गच्छ परस्तरम् ।

No. **16024**. नमकचमकम्.

NAMAKACAMAKAM.

Substance, palm leaf. Size, $15\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 26. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Taittirīyōpaniṣad 14*a*.

Same work as that described under No. 113 ante.

Wants the beginning. Printed.

No. **16025**. तैत्तिरीयोपनिषत्.

TAITTIRĪYŌPANIṢAT.

Pages, 53. Lines, 7 on a page.

Begins on fol. 14*a* of the MS. described under the last No.

Same work as that described under No. 486 ante.
Complete. Printed.

No. **16026**. कृष्णयजुर्वेदमन्त्रप्रश्नः

KṚṢṆAYAJURVEDAMANTRAPRAŚNAḤ.

Substance, palm-leaf. Size, 17¾ × 1½ inches. Pages, 34. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Same work as that described under No. 237 ante.
Breaks off in the 2nd Praśna. Printed.

No. **16027**. उत्तरगीता.

UTTARAGĪTĀ.

Substance, palm-leaf. Size, 14 and 18½ × 1½ inches. Pages, 31. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Gāyatrīrāmāyaṇa 17*a*. Upayuktāṁśasaṅgraha 20*a*.

Same work as that described under No. 2373 ante.
Complete. Printed.

No. **16028**. गायत्रीरामायणम्.

GĀYATRĪRĀMĀYAṆAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 17*a* of the MS. described under the last No.
Same work as that described under No. 14599 ante.
Complete. Printed.

No. **16029**. उपयुक्तांशसंग्रहः.

UPAYUKTĀṀŚASAṄGRAHAḤ.

Pages, 28. Lines, 9 and 7 on a page.

Begins on fol. 20*a* of the MS. described under No. 16027.

Same work as that described under R No. 2247 of the Triennial Catalogue of Sanskrit MSS.

By Vātsya Vēdāntācārya.
Complete.

No. 16030. नामलिङ्गानुशासनम्, द्राविडटीकासहितम्.
NĀMALIṄGĀNUŚĀSANAM WITH TAMIL MEANING.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{8}$ inches. Pages, 266. Lines, 6 on a page. Character, Grantha and Tamil. Condition, slightly injured. Appearance, old.

Same work as that described under No. 1621 ante.

Contains the first Kāṇḍa complete and breaks off in the Vaiśyavarga in the 2nd Kāṇḍa.

No. 16031. पुत्रस्वीकारविधिः.
PUTRASVĪKĀRAVIDHIḤ.

Substance, palm-leaf. Size, 18×1 inches. Pages, 44. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Dattamīmāṁsāsamīkaraṇa 19*a*. Aparaprayōga 24*a*. Punassandhāna 30*a*. Oḍyāṇadēvīpūjā 37*a*. Darśānnaśrāddhavidhi 42*a*. Vratasandhyā 56*a*. Prayōgacandrikā 60*a*. Āśīrvāda 112*a*

Same work as that described under No. 3176 ante.

By Rāmapaṇḍita.

Incomplete.

No. 16032. दत्तमीमांसासमीकरणम्.
DATTAMĪMĀṀSĀSAMĪKARAṆAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 19*a* of the MS. described under the last No.

This is a criticism on the Dattamīmāṁsā of Rāmapaṇḍita described under No. 3176 ante.

By Īśvarayajvan.

Complete.

Beginning:

श्रीरामविदुषा विरचिते दत्तमीमांसाभिधानपुत्रस्वीकारनिर्णये संशयवचनपूर्वकं न्यायविचारं कृत्वा क्रमेण पुत्रस्वीकारादिव्यवस्था कृता । तत्र कश्चिदिदमाशङ्कते । दत्तस्य प्रतिगृहीतृतत्पुत्रज्ञातीनां दशाहमाशौचम् । . . . . दत्तस्य मरणे च तेषां दशाहम् । स्वीकरणानन्तरमौरस उत्पन्ने तेन पितुः संस्कारादिकरणे दत्तस्य त्रिरात्रम् । तदानीं दत्तस्य तज्ज्ञातीनां च मृतौ मिथस्त्रिरात्रम् । जनयितुः पुत्रान्तरसद्भावे तन्मरणे दत्तस्य

त्रिरात्रम् । सहोदरभ्रातृमृतौ च त्रिरात्रम् । तज्ज्ञातीनां दत्तस्य मृतौ मिथ एकरात्रम् । जनकादीनां पुत्रपौत्रप्रपौत्राभावे जनकादिसंस्कारपक्षे दत्तस्य दशाहमित्युक्तम् । तदनुपपन्नम् ।

End :

अस्मिन्नुक्तार्थे श्रीरामविदुषा ज्ञातेऽपि दत्तस्यौरसपुत्रवत् पुत्रत्वदृढीकरणार्थं दशाहाशौचं प्रतिपादितम् । न तु वस्तुतः । अत एव गोत्रान्तरप्रविष्टानां दायमाशौचमेव चेत्यादिवचनानि पुत्रीकरणार्थानि, न तु गोत्रादिनिवृत्तिपराणीत्युक्तम् । तस्मादिदं विचारणं दत्तमीमांसासमीकरणं भवतीत्यवगन्तव्यम् ।

Colophon :

इत्यरुंगुरुकग्रामवासिनेश्वरयज्वना रचितं दत्तमीमांसासमीकरणमिष्यताम् ।
इति दत्तमीमांसासमीकरणं संपूर्णम् ।

No. 16033. अपरप्रयोगः.
APARAPRAYŌGAḤ.

Pages, 16. Lines, 5 on a page.

Begins on fol. *24a* of the MS. described under No. 16031.
Same work as that described under No. 3531 ante.
Incomplete.

No. 16034. पुनस्सन्धानप्रयोगः.
PUNASSANDHĀNAPRAYŌGAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. *32a* of the MS. described under No. 16031.
Same work as that described under No. 3691 ante.
Almost complete.

No. 16035. ओड्याणदेवीपूजाविधिः.
ŌḌYĀṆADĒVĪPŪJĀVIDHIḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. *37a* of the MS. described under No. 16031.

Deals with the procedure for conducting the worship of 'Ōḍyāṇadēvī' a form of Śakti.

Complete.

Beginning :

अनुज्ञा विघ्नेश्वरपूजां कृत्वा पुण्याहवाचनं कृत्वा पञ्चगव्यमङ्कुरं प्रतिसरं तदनन्तरं कलशप्रतिष्ठापनस्थाने स्योना पृथिवीति मन्त्रेण क्षेत्र-संभवां मृत्तिकां निक्षिप्य

तिला माषा व्रीहयश्च गोधूमाश्च प्रियङ्गवः ।
श्यामाकाश्च तथा मुद्गा सप्त धान्याः प्रकीर्तिताः ॥

ततः पूर्णकलशं गन्धादिनालंकृत्य, इमं मे गङ्गे, आपो वा इदं सर्व-मिति जलेनापूर्य गन्धद्वारेति गन्धं निक्षिप्य ।

* * * *

त्रिकोणं चैव षट्कोणं वृत्तमष्टदलं तदा ।
तद्बहिश्चतुर्द्वारं चतुरश्रं विनिर्दिशेत् ॥
एवं यन्त्रं समालिख्य तत्तत्पूजां समाचरेत् ।

ततः अक्षतादिभिः पीठार्चनं कुर्यात् । चतुरश्रस्य पूर्वदिग्भागे ओं ओड्याणपीठं पूजयामि ओड्याणेश्वरोपनाथं पूजयामि ओड्याणाम्बा प्र . . .

End :

सुन्दरमुखाम्बुजायै मुखं, उत्पलनेत्रायै नमः नेत्रे, लसत्कुण्डलायै नमः कर्णौ, चन्दनतिलकायै नमः ललाटं, श्रीमहालक्ष्म्यै नमः शिरः, श्रीमहात्रिपुरसुन्दर्यै नमः सर्वाङ्गम् ।

No. **16036**. दर्शान्नश्राद्धविधिः.
DARŚĀNNAŚRĀDDHAVIDHIḤ.

Pages, 28. Lines, 5 on a page.

Begins on fol. 42*a* of the MS. described under No 16031.
Same work as that described under No. 3634 ante.
Complete.

No. **16037**. व्रतसन्ध्या.
VRATASANDHYĀ.

Pages, 8. Lines, 4 on a page.

Begins on fol. 56*a* of the MS. described under No. 16031.

On the performance of Sandhyāvandana in certain Vratas.
Incomplete.

Beginning:

प्रोक्षणम् । अपवित्रः . . . शुचिः । आचम्य हस्ते जलं गृहीत्वा उत्तिष्ठन्तु भूतपिशाचाः ये ते भूमिधारकाः । एतेषामविरोधेन ब्रह्मकर्म समारभे । प्राणायामम् । पूर्वोक्त . . , शुभतिथौ व्रतसन्ध्यावन्दनं करिष्ये ।

End:

अच्युतेति नाभौ, जनार्दनेति हृदये, उपेन्द्रेति शिरसि, हरे कृष्णेति बाह्वोः ।

Fol. 60 contains Agnisandhānaprayōga.

No. 16038. प्रयोगचन्द्रिका.
PRAYŌGACANDRIKĀ.

Pages, 102. Lines, 6 on a page.

Begins on fol. 61*a* of the MS. described under No. 16031.
Same work as that described under No. 3713 ante.
Incomplete. Printed.

No. 16039. आशीर्वादः.
ĀŚĪRVĀDAḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 112*a* of the MS. described under No. 16031.
Similar to the work described under No. 3559 ante.
Complete.

No. 16040. अपरप्रयोगः.
APARAPRAYŌGAḤ.

Substance, palm-leaf. Size, 17 × 1 inches. Pages, 102. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Grahaṇadōṣavāraṇaślōka 52*a*. Dharmaśāstraviṣaya 53*a*.
Same work as that described under No. 3531 ante.
This Prayōga is according to Drāhyāyaṇasūtra.
Complete.

No. **16041.** ग्रहणदोषवारणश्लोकाः
GRAHAṆADŌṢAVĀRAṆAŚLŌKĀḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 52*a* of the MS. described under the last No.
Same work as that described under No. 3298 ante.
Complete.

No. **16042.** धर्मशास्त्रविषयः.
DHARMAŚĀSTRAVIṢAYAḤ.

Pages, 4 Lines, 6 on a page.

Begins on fol. 53*a* of the MS. described under No. 16040.
Contains some matter relating to the Dharmaśāstras.
Incomplete.

Beginning:

आवाहनाग्नौकरणं स्वधानिनयनं तथा ।
विकिरं पिण्डदानं च सङ्कल्पे पञ्च वर्जयेत् ॥
. . . वाहनं चैव द्विजाङ्गुष्ठनिवेदनम् ।
विकिरं तृप्तिपृच्छे च तीर्थे पञ्च विवर्जयेत् ॥
. . . . ब्दे सापिण्ड्ये कालकामुकौ ।
धुरि रोचनौ च काम्येषु वसुसत्यौ च नान्दिषु ॥
. . . श्राद्धे क्रतुदक्षौ श्राद्धरक्षकरास्तु ते ।

End:

सप्तम्यां सप्तमे वर्षे सप्तमासे ऋर्क्षेदिने ।
रात्रौ हि भीमरथ्याख्या सर्वप्राणापहारिणी ॥
पिष्टनाड्ये जन्मऋक्षे पर्वमुक्तिर्यदा भवेत् ।
कुहूसञ्ज्ञा भवेत् . . . . कुर्याद्विचक्षणः

No. **16043.** सिद्धान्तकौमुदी.
SIDDHĀNTAKAUMUDĪ.

Substance, palm-leaf. Size, 13½ × 1½ inches. Pages, 22. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Contains from the beginning to the end of Svādisandhi in the Pūrvārdha.

Same work as that described under No. 1354 ante.

By Bhaṭṭōjidīkṣita. Printed

No. 16044. उत्तरसंस्कारविधिः

UTTARASAṀSKĀRAVIDHIḤ.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 292. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Fol. 1 contains Kālabhairavasūtra.

Explains the ceremonies to be performed after the death of a person, in order that his soul may be happy in the other world.

Incomplete.

Beginning:

अथोत्तरसंस्कारः सपिण्डीकरणान्तः प्रस्तूयते—उत्तरसंस्कारो नाम ब्राह्मणादीनां पुत्रादिभिः कर्तव्यः संस्कारविशेषः प्रेतत्वनिवृत्तिद्वारा पित्रादीनां पुण्यलोकसंपादनकरः शास्त्रविहितः कर्मविशेषः ।

तथाच समन्तुः—

पुत्रः पितुश्च कुर्वीत मृतयोरौरसस्सुतः ।
पैतृमेधिकसंस्कारं मन्त्रपूर्वकमाहृतम् ॥ इति ॥

पितृमेधस्तत्र विहितं मन्त्रपूर्वकमित्यर्थः । तत्र जन्मज्येष्ठ एव पित्रोः कुर्यात् । ज्येष्ठस्यैव तु पुत्रत्वादितरे कामजाः स्मृताः इति मनुना ज्येष्ठस्यैवाधिक्यविधानात् । तदभावे विद्यमानेषु ज्येष्ठः कुर्यात् । सर्वज्येष्ठस्य व्याध्यादिना अशक्तावग्निदानमात्रं तेनैव कारयेत् ।

End:

अत एव पैठीनसिः—

विभक्तैस्तु पृथक्कार्यं प्रतिसंवत्सरादिकम् ।
एकेनैवाविभक्तेषु कृते सर्वैस्तु तत्कृतम् ॥ इति ।

एवञ्च भ्रातरस्तावदविभक्ताश्चेत् एकेनैव कर्तव्यत्वमवगतम् । एवं सति ज्येष्ठ .

No. 16045. गारुडपुराणम्.
GĀRUḌAPURĀṆAM.

Substance, palm-leaf. Size, 17¾ × 1½ inches. Pages, 112 Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Same work as that described under No. 2138 ante.

Contains 1—32 Adhyāyas; but wants the beginning in the first Adhyāya. Printed.

No. 16046. तैत्तिरीयोपनिषत्.
TAITTIRĪYŌPANIṢAD.

Substance, palm-leaf. Size, 14⅞ × 1⅜ inches. Pages, 52. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Kṛṣṇayajurvēda-brāhmaṇa 27*a*.

Same work as that described under No. 486 ante.

Contains the 2nd Praśna complete. Printed.

No. 16047. कृष्णयजुर्वेदब्राह्मणम्.
KṚṢṆAYAJURVĒDABRĀHMAṆAM.

Pages, 76. Lines, 6 on a page.

Begins on fol. 27*a* of the MS. described under the last No.

Same work as that described under No. 142 ante.

Contains 2 and 3 Praśnas, in the 3rd Aṣṭaka. Printed

No. 16048. कृष्णयजुर्वेदब्राह्मणम्.
KṚṢṆAYAJURVĒDABRĀHMAṆAM.

Substance, palm-leaf. Size, 16½ × 1 inches. Pages, 204. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Same work as that described under No. 142 ante.

Contains from the beginning of the 2nd Aṣṭaka to the end of the 8th Aṣṭaka incomplete Printed.

No. 16049. ब्रह्मसूत्रभाष्यम्.
BRAHMASŪTRABHĀṢYAM.

Substance, palm-leaf. Size, 17⅝ × 1⅝ inches. Pages, 365. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Breaks off in the 2nd Pāda of the 2nd Adhyāya.

Same work as that described under No. 4993 ante.

By Rāmānujācārya. Printed.

No. 16050 चिदम्बरमाहात्म्यम्.

CIDAMBARAMĀHĀTMYAM.

Substance, palm-leaf. Size, 17½ × 1 inches. Pages, 116 Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Puṇḍarīkapuramāhātmya 58*a*.

Same work as that described under No. 2429 ante.

Complete.

No. 16051. पुण्डरीकपुरमाहात्म्यम्.

PUṆḌARĪKAPURAMĀHĀTMYAM.

Pages, 56. Lines, 6 on a page.

Begins on fol. 55*a* of the MS. described under the last No.

Same work as that described under No. 1468 ante.

Complete.

No. 16052. ब्रह्मसूत्रभाष्यव्याख्या—मूलभावप्रकाशिका.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ : MŪLABHĀVAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 123. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Same work as that described under No 4959 ante.

By Raṅgarāmānuja

Contains the Jijñāsādhikaraṇa incomplete.

No. 16053. सङ्गीतविषयः.

SAṄGĪTAVIṢAYAḤ.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 58. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Similar to the work described under No. 13013 ante.

Incomplete.

No. 16054. सङ्गीतविषयः
SAṄGĪTAVIṢAYAḤ.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 60. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Same work as that described under No. 13013 ante.

Contains Rāgavarṇa only.

Incomplete.

No. 16055. सोमहौत्रम्.
SŌMAHAUTRAM.

Substance, palm-leaf. Size, 14½ × 1 inches. Pages, 130. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Fol. 66 contains Pañcaliṅgastōtra.

Same work as that described under No. 1137 ante.

Complete.

No. 16056. भागवतम्, सव्याख्यानम्.
BHĀGAVATAM WITH COMMENTARY.

Substance, palm-leaf Size, 19½ × 1½ inches. Pages, 148. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

The text with the commentary called Bhāvārthadīpikā, by Śrīdharasvāmin.

Same work as that described under No 2199 ante

Contains from the 13th Adhyāya to the end of the 1st Skandha complete, and the 2nd Skandha and the 1st Adhyāya in the 3rd Skandha. Printed.

No. 16057. गीतगोविन्दव्याख्या—सारदीपिका.
GĪTAGŌVINDAVYĀKHYĀ : SĀRADĪPIKĀ.

Substance, palm-leaf. Size, 16 × 1⅛ inches Pages, 74. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Same work as that described under No. 11966 ante.

By Jagaddhara.

Wants the beginning and end.

No. 16058. लक्ष्मीतन्त्रम्.
LAKṢMĪTANTRAM.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 80. Lines, 7 on page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Pādmatantra 41*a*.

Same work as that described under No. 5356 ante.

Contains Adhyāyas 1—17 complete.

No. 16059. पाद्मतन्त्रम्.
PĀDMATANTRAM.

Pages, 21. Lines, 7 on a page.

Begins on fol. 41*a* of the MS. described under the last No.

Same work as that described under No. 5293 ante.

Contains 1—5 Adhyāyas in the Yōgapāda. Printed.

No. 16060. रामायणव्याख्या.
RĀMĀYAṆAVYĀKHYĀ

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 518. Lines, 9 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Same work as that described under No. 1897 ante, by Gōvindarāja. Breaks off in the Sundarakāṇḍa and wants the beginning in the Bālakāṇḍa. Printed.

No. 16061. अपरप्रयोगः.
APARAPRAYŌGAḤ.

Substance, palm-leaf. Size, $11\frac{1}{4} \times 1\frac{1}{8}$ inches. Pages, 48. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Same work as that described under No. 3531 ante.

Contains up to the end of Vidhurasaṁskāra.

No. 16062. वैयाकरणभूषणसारः.
VAIYĀKARAṆABHŪṢAṆASĀRAḤ.

Substance, palm-leaf. Size, $10 \times 1\frac{1}{2}$ inches. Pages, 174. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Same work as that described under No. 1484 ante.

By Kauṇḍabhaṭṭa. Printed.
Contains up to the end of Subarthanirṇaya.

No. 16063. भागवतव्याख्या—शुकतात्पर्यरत्नावलिः.
BHĀGAVATAVYĀKHYĀ : ŚUKATĀTPARYARATNĀVALIḤ

Substance, palm-leaf. Size, 16⅜ × 1½ inches. Pages, 370. Lines, 10 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Same work as that described under No. 2230 ante.
By Vīrarāghava of Vatsagōtra.
Contains from the beginning to the 60th Adhyāya in the tenth Skandha. Printed.

No. 16064. कृष्णयजुर्वेदभाष्यसंग्रहः.
KṚṢṆAYAJURVĒDABHĀṢYASAṄGRAHAḤ.

Substance, palm-leaf. Size, 17 × 1¾ inches. Pages, 356. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Same work as that described under No. 15714 ante.
By Naidhruva Vēṅkaṭēśa
Contains Kāṇḍas 5 and 6 complete and breaks off in the 25th Anuvāka in the 7th Kāṇḍa.

Beginning:

सावित्राणि जुहोति । सावित्रैर्मन्त्रैरेकामाहुतिं जुहोति । मन्त्रबहुत्वाभिप्रायं बहुवचनम् . . . . । प्रसूत्यै अन्यज्ञानाय सवित्रानुज्ञातं यथा स्यादिति । चतुर्गृहीतेनेत्यादि गतम् । चत्वारि छन्दांसीति । गायत्रीत्रिष्टुब्जगत्यनुष्टुब्रूपाणि, वः युष्माकं भागानि हव्यं च वयं न वक्ष्याम इति ।

* * * *

Colophon:

इति नैध्रुववेङ्कटेशकृते वेदभाष्यसंग्रहे पञ्चमकाण्डे प्रथमे पाठके प्रथमोऽनुवाकः ।

End:

Colophon:

इति द्वाविंशोऽनुवाकः ।

अष्टसन्नतिहोमः . . . . यजमानोऽग्नये समनमत् पर्यचरत् । यथाग्निः पृथिव्या इति पृथिव्या . . . . सन्नन्ता उपकाराः सन्नमन्तु उपनता भवन्तु । एवमुत्तरत्रापि

*   *   *   *

यजमानान्तरे व्रज हि । उपस्थानमन्त्रः नमोऽग्नय इति ।

No. **16065.** आपस्तम्बगृह्यसूत्रवृत्तिः—अनाकुला.

ĀPASTAMBAGṚHYASŪTRAVṚTTIḤ : ANĀKULĀ.

Substance, palm-leaf. Size, 16⅜ × 1½ inches. Pages, 104. Lines, 6 on a page. Character, Telugu. Condition, injured on the left side. Appearance, old.

A commentary on the Āpastambasūtras on household ceremonies, by Haradatta. Printed.

Complete.

Beginning:

. . . . . यद्गृह्यमापस्तम्बेन निर्मितम् ।
क्रियते हरदत्तेन तस्य वृत्तिरनाकुला ॥

अथ कर्माण्याचाराद्यानि गृह्यन्ते—

द्विविधानि कर्माणि श्रुतिलक्षणा . . . . तिलक्षणानि व्याख्यातानि । इदानीं प्रयोगाद्यानि ज्ञायन्ते न तु प्रत्यक्षश्रुत्या तानि विवाहादीनि व्याख्यास्याम इत्यधिका . . . . दि- नियमः । सर्वत्र स्वयं प्रज्वलितेऽग्नावित्यादीनि च गार्ह्यकर्मस्येदं भवन्ति । अथ- शब्देनानन्तर्यार्थकेन श्रौतोक्तानां त्रयाणां . . . . कर्मा- दीन्तसन्निपातये । तदिदं सर्वप्रायश्चित्तमित्यादि परिभाषाणां मन्त्रापेक्षां दर्शयति ।

उदगयनपूर्वपक्षाहःपुण्याहेषु कार्याणि ।

End:

शम्याः परिध्यर्थे परिषेचनान्तं कृत्वाभिमृतेभ्य उत्तरया दक्षिणतोऽश्मानं परिधिं दधाति । येषां पूर्वापरा अन्वञ्चः प्रमीयन्ते तेषा . . . त्यशमनार्थं इमं जीवेभ्य इत्येतया परिषेचनान्ते मृत्युवारणमश्मानं परिधिं प्रतिष्ठापयति । द्विरुक्तिः प्रश्नसमाप्तिसूचनाय ।

Colophon:

इति हरदत्तकृतगृह्यव्याख्यायामनाकुलायामष्टमः पटलः ।
समाप्तमापस्तम्बगृह्यव्याख्यानम् ।

No. **16066.** पाद्मपुराणम्.

PĀDMAPURĀṆAM.

Substance, palm-leaf. Size, 11 × 1 inches. Pages, 264. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Same work as that described under No. 2129 ante.

Contains Uttarakāṇḍa complete. Printed.

No. **16067.** दिनकरीयव्याख्या—तरङ्गिणी.

DINAKARĪYAVYĀKHYĀ : TARAṄGIṆĪ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 100. Lines, 10 on a page. Character, Grantha and Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Tarkasaṅgrahadīpikāvyākhyā : Nārasiṁhaprakāśikā 51*a*, Pratāparudrīya 61*a*.

Same work as that described under No. 3965 ante.

By Rāmarudrabhaṭṭa. Printed.

Breaks off in the Kālalakṣaṇa.

No. **16068.** तर्कसंग्रहदीपिकाव्याख्या—नारसिंहप्रकाशिका.

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ : NĀRASIṀHA-PRAKĀŚIKĀ.

Pages, 19. **Lines,** 8 on a page.

Begins on fol. 51*a* of the MS. described under the last No.

Same work as that described under No. 4170 ante.

By Rāya Narasiṁha.

Contains Maṅgalavāda incomplete. Printed.

No. **16069.** प्रतापरुद्रीयम्.

PRATĀPARUDRĪYAM.

Pages, 8. **Lines,** 7 on a page.

Begins on fol. 61*a* of the MS. described under No. 16067.

Same work as that described under No. 129?2 ante. By Vidyānātha.

Contains Dōṣaprakaraṇa incomplete. Printed.

No. 16070. सच्चरित्रसुधानिधिः.
SACCARITRASUDHĀNIDHIḤ.

Substance, palm-leaf. Size, 15½ × 1⅝ inches. Pages, 119. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Same work as that described under No. 2863 ante.

By Vīrarāghava.

Complete. Printed.

No. 16071. ग्रन्थमालिकास्तोत्रम्.
GRANTHAMĀLIKĀSTŌTRAM.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 4. Lines, 5 on a page. Character, Grantha and Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Brahmatattvasubōdhinī 3*a*, Mānasōllāsa 61*a*.

Same work as that described under R. No. 1452(*d*) of the Triennial Catalogue of Sanskrit MSS

Complete; but with the following additional stanza before the colophon.

श्रीमन्मध्वमते हरिः परतरः सत्यं जगत् तत्त्वतो
भिन्ना जीवगणा हरेरनुचरा नीचोच्चभावं गताः ।
मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनं
ह्यक्षादि त्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः ॥

No. 16072. ब्रह्मतत्त्वसुबोधिनी.
BRAHMATATTVASUBŌDHINĪ.

Pages, 118. Lines, 7 on a page.

Begins on fol. 3*a* of the MS. described under the last No.

Same work as that described under R. No. 1716 of the Triennial Catalogue of Sanskrit MSS; but with a different colophon.

Complete.

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदखण्डानन्दसरस्वतीपादाब्जसेवापरायणेन श्रीमत्कृष्णानन्दयतिना विरचिता ब्रह्मतत्त्वसुबोधिनी समाप्ता ।

No. 16073. मानसोल्लासः.
MĀNASŌLLĀSAḤ.

Pages, 3. Lines, 6 on a page. Telugu.

Begins on fol. 61*a* of the MS. described under No. 16071

Contains the 9th Ullāsa only.

Same work as that described under No. 10996 ante.

By Surēśvarācārya. Printed.

No. 16074. स्वानुभवप्रकरणम्.
SVĀNUBHAVAPRAKARAṆAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 62*a* of the MS. described under No. 16071.

A short Advaitic treatise on the realisation of the undifferentiated oneness of the soul which, however, seems to possess attributes, owing to nescience.

By Rāmāśrama.

Complete.

Beginning :

गुरुरद्वयचिन्मात्रः शिष्यं शिष्यगुणान्वितम् ।
प्रोवाच कृपया साक्षाद्ब्रह्मैक्यज्ञानसिद्धये ॥
मय्यद्वये कथं वाक्यं वैदिकव्यवहारकृत् ।
कर्तृत्वादिस्तस्य यद्वा गमनं शृण्वपोहनम् ॥
अहमद्वय एवास्मिन् व्यवहारे त्वविद्यया ।
तनुद्वये चिदाभासद्वारेणाध्यस्तलक्षणः ॥
स्थूलगं ब्राह्मणत्वादि कर्तृत्वाद्यपि सूक्ष्मगम् ।
बीजगान्य . . तादीनि प्राप्नोतीव स्थितस्ततः ॥

End :

अज्ञानलेशो मयि नास्ति नापि तत्कार्यबुद्ध्याद्यखिलप्रपञ्चः ।
तथा च कार्याण्यपि वैदिकानि किमु प्रवक्तव्यमिति स्वनिष्ठा ॥
सर्वत्र लोकानुजिघृक्षयैव रामाश्रमस्वामिभिरुक्तमेतत् ।
सदा सदाचार्यमुखे विचार्य सन्तः सुखेनैव वसन्तु शान्ताः ॥

Colophon :

स्वानुभवप्रकरणं समाप्तम् ।

No. 16075. अध्यारोपप्रकरणम्.
ADHYĀRŌPAPRAKARAṆAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 62*b* of the MS. described under No. 16071.

A short Advaitic treatise explaining how the phenomenal world is super-imposed on Brahman by nescience, and how Brahman alone is the supreme reality, while the material universe is comparatively unreal.

Complete.

Beginning:

यतस्समस्तानि भवन्ति येन जीवन्ति यान्ति प्रलयं च यस्मिन् ।
योऽस्मात्परस्माच्च परः परात्मा तमच्युतं सर्वगुरुं नतोऽस्मि ॥
येन स्वरूपमात्रेण गुरुणा करुणात्मना ।
ब्रह्मैवास्मीति संवेत्ति तत्पादाब्जं नतोऽस्म्यहम् ॥
अध्यारोपापवादाभ्यां ब्रह्म ज्ञातव्यमव्ययम् ।
तथा चादौ प्रवक्तव्यमध्यारोपनिरूपणम् ॥
वस्तुन्यवस्तुनो बुद्धिरध्यारोपस्तथा भवेत् ।
तत्क · · च्छृणु प्राज्ञ ततो दृष्टान्तपूर्वकम् ॥

End:

यस्यैवात्मा सत्यमभूत्पश्येत् कं केन कं वदेत् ।
शृणुयात्केन कं जिघ्रेद् बहुना भाषणेन किम् ॥
अध्यारोपापवादाभ्यामेव याथात्म्यमात्मनः ।
यो वेत्ति पुरुषः साक्षाद्ब्रह्म प्राप्नोत्यसंशयम् ॥

Colophon:

अध्यारोपापवादप्रकरणं समाप्तम् ॥

No 16076. ब्रह्मसूत्रभाष्यव्याख्या—श्रुतप्रकाशिका.
BRAHMASŪTRABHĀṢYAVYĀKHYĀ: ŚRUTAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 374. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Same work as that described under No. 4964 ante.

By Sudarśanasūri.

Contains from the 2nd Pāda of the 3rd Adhyāya to the end of the 4th Adhyāya. Printed.

The scribe adds—

कल्यब्दे सारधीभे कुशलमतिमिते वत्सरे पार्थिवाख्ये
कुम्भाष्टम्यां सितायां शशिसुतदिवसे रोहिणीतारयुक्ते ।
आचार्याद्व्यासनाम्नः स्वयमुदयवतीं संयमीन्द्रोक्तिसार-
व्याख्यां पूर्णां लिलेख प्रथितगुरुदयालम्बनो वेङ्कटार्यः ॥

No. 16077. इतिहासोत्तमम्.
ITIHĀSŌTTAMAM.

Substance, palm-leaf. Size, 13 × 1 inches. Pages, 161. Lines, 7 on a page. Character, Telugu. Condition, slightly injured Appearance, old.

Begins on fol. 1*a*. The other work herein is Viṣṇudharmōttara 82*a*.

Wants the beginning in the 1st Adhyāya and complete in 25 Adhyāyas.

Same work as that described under No. 1978 ante.

The scribe adds—

श्रीशैलवंशजातेन शिङ्गरार्यस्य सूनुना ।
रङ्गाचार्येण लिखितमितिहासोत्तमं तदा ॥

No. 16078. विष्णुधर्मोत्तरम्.
VIṢṆUDHARMŌTTARAM.

Pages, 198. Lines, 6 on a page.

Begins on fol. 82*a* of the MS. described under the last No.

Contains 1 to 27 Adhyāyas.

Same work as that described under No. 2113 ante.

Printed.

No. 16079. स्मृतिरत्नाकरः.
SMṚTIRATNĀKARAḤ.

Substance, palm-leaf. Size, 15½ × 1¼ inches Pages, 546. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Same work as that described under No. 2805 ante.

By Vēṅkaṭācārya (Vaidikasārvabhauma).

Foll. 1—2 contain Puṇyāhavācana.

Complete. Printed.

The scribe adds—

कालयुक्तिनामसंवत्सरं मार्गशिरमासं शुक्लपक्षं पञ्चमी गुरुवारे कार्तिके १४. श्रीरङ्गपट्टणे अण्णास्वामितिरुमलय्यंगार्स्वामिदासेन अण्णास्वामि रामानुजस्वामिनः पुत्रेण तिरुनारायणदासेन स्मृतिरत्नाकरं नामाह्निकं लिखितम् ।

No. 16080. स्वरसिद्धान्तचन्द्रिका.
SVARASIDDHĀNTACANDRIKĀ.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 178. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Kārikāvalīvyākhya : Muktāvalī 90*a*.

Same work as that described under No. 1023 ante.

By Śrīnivāsa.

Breaks off in the Avyayībhāvasvara. Printed.

No. 16081. कारिकावलीव्याख्या—मुक्तावली.
KĀRIKĀVALĪVYĀKHYĀ : MUKTĀVALĪ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 90*a* of the MS. described under the last No.

Wants the beginning and end.

Same work as that described under No. 3939 ante.

By Viśvanāthapañcānana. Printed.

Fol. 92 contains some Dharmaśāstraślōkas.

No. 16082. ब्रह्मतत्त्वसुबोधिनी.
BRAHMATATTVASUBŌDHINĪ.

Substance, palm-leaf. Size, 15 × 1 inches. Pages, 110. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old

Foll. 56—57 contain Vēdāntaviṣaya.

Same work as that described under R. No. 1716(*a*).

By Kṛṣṇānandayati.

Complete.

No. **16083.** विषयवाक्यदीपिका·
VIṢAYAVĀKYADĪPIKĀ.

Substance, palm-leaf. Size, 18 × 1⅛ inches. Pages, 174. Lines, 11 on a page. Character, Grantha. Condition, injured. Appearance, old.

Same work as that described under No. 5001 ante.

By Raṅgarāmānujamuni.

Complete Printed.

No. **16084.** गृह्यरत्नम्.
GṚHYARATNAM.

Substance, palm-leaf. Size, 18¼ × 1⅝ inches. Pages, 54. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Breaks off in the 21st Khaṇḍa.

Same work as that described under No. 1198 ante.

By Vaidikasārvabhauma. Printed.

No. **16085.** विश्वामित्रकल्पः.
VIŚVĀMITRAKALPAḤ.

Substance, palm-leaf. Size, 12¼ × 1¼ inches. Pages, 304. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Same work as that described under R. No. 359 of the Triennial Catalogue, Vol. I, Part I-A.

Incomplete.

No. **16086.** भागवतव्याख्या — चन्द्रिका.
BHĀGAVATAVYĀKHYĀ : CANDRIKĀ.

Substance, palm-leaf. Size, 19½ × 1 inches. Pages, 100. Lines, 7 on a page. Character, Grantha and Telugu. Condition, slightly injured. Appearance, old.

Same work as that described under No. 2232 ante, by Vīrarāghava.

Contains the 12th Skandha complete. Printed.

Beginning :

तदेवं नवमस्कन्धेनोपक्रान्तसूर्यवंशावलिं तदन्तरापतितसोमवंशावलिं च श्रीकृष्णावतारपर्यन्तां निरूप्य भगवतोऽवतारप्रभृतीनि स्वधामानुगमनान्तानि चेष्टितानि दशमैकादशाभ्यां निरूपितानि । अथ भाविसोमवंश-

परम्परोत्तरावधिबुभुत्सया पृच्छति—स्वधामानुगत इति । यदुवंशस्य भूषणवच्छोभावहे श्रीकृष्णे स्वधाम स्वस्थानमनुगते सति ततः यदुवंशजानां सोमवंश्यानामुक्तानां मध्ये कस्य वंशोऽभवत् वंशपरम्परा प्रावर्तत । तदेतत् हे मुने मह्ममाचक्ष्व । बार्हद्रथवंशोऽभवदित्यभिप्रेत्य भाविकं तमनुवर्णयितुमारभते—योऽन्त्यः पुरञ्जयो नामेति ।

Colophon:

इति श्रीमद्भागवतचन्द्रिकायां द्वादशस्कन्धे प्रथमोऽध्याय. ।

End:

साक्षात्कृतान्तरात्मस्वरूपोऽपि भगवल्लीलाभिराकृष्टचित्त इत्यर्थः । तदीयमगणितस्वरूपरूपगुणविभूतिप्रकाशकं तत्त्वानां चिदचिद्गतानामनारोपिताकाराणां दीपमिव प्रकाशक . . . . कृपयाद्यातनुत प्रकाशितवान् तं व्याससूनुं नतोऽस्मि ।

Colophon:

इति श्रीवत्सकुलपयःपारावारराकासुधाकरस्य श्रीशैलगुरोस्तनयेन . . . . हृदयेन वीरराघवविदुषा लिखितायां श्रीमद्भागवतचन्द्रिकायां द्वादशस्कन्धे द्वादशोऽध्यायः ।

The scribe adds—

. . . . . गोपालाचार्यकुमारवीरास्वामिस्वहस्तलिखितं श्रीभागवतद्वादशस्कन्धव्याख्यानम् ।

No. **16087.** हरिभक्तिसुधोदयः·

HARIBHAKTISUDHŌDAYAḤ.

Substance, palm leaf. Size, 18 × 1½ inches. Pages, 96. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Same work as that described under **No.** 15698 ante.

Complete.

No. **16088.** रतिभूषणभाणः·

RATIBHŪṢAṆABHĀṆAḤ.

Substance, palm-leaf. Size, 14⅝ × 1⅝ inches. Pages, 30. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

A drama, in the Bhāṇa style, having for its subject matter the deeds of God Viṣṇu. From the introductory lines, it appears that

the author was one Kavitārkikakaṇṭhīrava, brother of Vēdānta-rāmānujasvāmin, son of Nṛsiṁhārya of the Cakravarti family residing at Śrīpura.

Complete.

Beginning:

हेवाकात्परितः स्वतः . . . . देवासुरे
सत्ये शोभिनि लक्ष्मणे कुरु रतिं भद्रे मयीति ब्रुवन् ।
क्रोडाक्रीडनिरूढगौरवरमाकृत्या कृतात्याहित-
स्तुल्यर्येण हितां सतामतिवदन् पायात् परः पूरुषः ॥

अपिच —

कस्त्वं गोपालबालः सुतनु पशुकुलं याहि मा याहि गेहं
बाले लीलाविनोदी सरसमपसर द्रागमी यामिकाद्याः ।
निर्वक्री देवि चक्री भव भुवनपतेस्तल्पमाकल्पमेवं
भावापेक्षी प्रियायाः क्वचन वचनतः पातु पद्मापतिर्नः ॥

नान्द्यन्ते सूत्रधारः। अहो किल सकलरसिकनिकरनिरङ्कुशनिरुपमनिस्सीमविलसननिवासभूमिरभिनवविविधभूमिकापरिकरपरिकल्पितविटनटकिरीटायमानविमलगुणबृन्दचन्दिराविभवशुभमन्दिरगुरुनरानन्दगोविन्दराजाविराजमान - चरणराजीवसेवाहेवाकरससमापतदमरनगरकिन्नरी

* * * *

श्रीपुरे श्रीनिवासचरणसरसीरुहयुगलनिगलितमानसे तदनुरूपकृपापरिपाकनिरूपितचक्रवर्तिबिरुदसमन्वये महान्वये विरचितशुभावतारः प्रतापितविमतमतचारः सन्ततसन्तन्यमानवेदान्तोदन्तनितान्तोदञ्चितनिखिलदिगन्तरालदन्तावलोपरि प्रकाशितयशस्सितातपत्रः पवित्रतमचरित्रः प्रवर्तितविविधनयपदगतिरनुद्धतगतिरभूत् प्रभूतसुगुणधुर्यः श्रीमान् नृसिंहार्यः ।

अहिपतिराहिताहिमयगं हरजिह्मगति-
श्चरति चिराभिमृ . . . . . षणो धिषणः ।
किमुत मितंपचः कणभुगादिगुणस्तरसा
महति नृसिंहदेशिकपदे जगति स्फुरति ॥
यतिपतियामुनप्रभृतिदेशिकदर्शितधी-
नखमुखदारितारिमदवारणकूटतटः ।

दिशि दिशि लक्ष्यकीर्तिमयमौक्तिकपङ्क्तिरसौ
न कथमुदारमेति नरसिंहपदं सुपदम् ॥
श्रीमद्वैदिकसार्वभौमसरणिः श्रीश्रीनिवासो यतो
जातस्सूरिजनाग्रणीः स्वसदृशा यस्यानुजाः पञ्चषाः ।
तत्राप्यद्भुतवैभवस्समभवद्वेदान्तरामानुज
स्वामीत्याकलितस्समञ्चितमहाविद्यानिषद्यायितः ॥
कवितार्किककण्ठीरव इति तत्करुणैकपरिणताकारः ।
रतिभूषणमिति भाणं तदनुजनिर्व्याजहार जनगेयम् ॥
(आकाशे कर्णं दत्वा) किं ब्रूथ?
अङ्गनामणिरिवाङ्गजन्मनस्साधनं परमबाधनं मुदः ।
रूपकं हरिकथानिरूपकं श्रावयाद्रवदेतदेव नः ॥

End:

तथापीदमस्तु ।
प्रतिपद्पदभूषाभाषिनाशुश्रवश्री-
रभिनवदरहाससमेरवक्त्रारविन्दा ।
सदयमुदयमाना सर्वदा सर्वदा मे
भवतु यदुकुलेन्दोः शाश्वती भाग्यपङ्क्तिः ॥
इति ससन्तोषं परिक्रम्य निष्क्रान्ताः ।

Colophon:

इति रतिभूषणभाणं नाम भाणः समाप्तः ।

No. **16089.** भागवतम्, सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, palm-leaf. Size, 14½ × 1 inches. Pages, 244. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Same work as that described under No. 2232 ante.

By Vīrarāghava.

Contains the 2nd Skandha almost complete, but wants the beginning. Printed.

Beginning:

. . . प्रश्नायोगात् । जानाति चेत् सुतरां प्रश्नानुपपत्तिः । अतः सामान्याकारेणात्मश्रवणादीनां मुक्तिसाधन . . . . मजानतोऽयं

प्रश्न इति प्रश्नस्य विशेषनिष्ठत्वादात्मवित्संमतत्वाभिनन्दनोपपत्तिः । अथ ब्रूहि यद्वा विपर्ययमित्यस्य . . . . र्थमाह ।

श्रोतव्यादीनि राजेन्द्र नृणां सन्ति सहस्रशः ।
अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनाम् ॥

. . . . . गृहमेधिनां नृणां श्रोतव्यादीनि सहस्रशस्सन्ति मुमुक्षोस्तु ब्रह्मैकमेवेत्यभिप्रायः । तदनुबन्धित्वेन तूपासकानां . . . . तद्गतपञ्चसूनापराणां मेधा बुद्धिः गृहेषु मेधा एषामस्तीति गृहमेधिनः ।

Colophon:

इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोः सुतेन तच्चरणकमलपरिचर्याप्रसन्नतत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णवदासेन वीरराघवविदुषा लिखितायां श्रीमद्भागवतचन्द्रिकायां श्रीमद्भागवतव्याख्यायां द्वितीयस्कन्धे प्रथमोऽध्यायः ।

End:

राज्ञेति । परीक्षिता राज्ञा आसमन्तात् पृष्टो महामुनिः शुकः मैत्रेयेणोक्तमवोचत् तदेव राज्ञः प्रश्नानुसारतः राजप्रश्नानुक्रमेण वो युष्मभ्यमभिधास्ये शृणुत ।

Colophon:

इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य . . . . द्वितीयस्कन्धे दशमोऽध्यायः ।

स्कन्धश्च समाप्तः ।

No. 16090. भागवतम्, चन्द्रिकाव्याख्यानसहितम्.

BHĀGAVATAM WITH THE COMMENTARY CANDRIKĀ.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 284. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

A commentary on the Śrībhāgavata.

By Vīrarāghava.

Contains the first Skandha complete. Printed.

Beginning:

(मू)—

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञस्स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः ।

तेजोवारिमृदां यतो विनिमयो यत्र त्रिवर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥

(व्या)—

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥

वन्दे वात्स्यमहोबलार्यतनयं वात्सल्यवारां निधिं
श्रीशैलेशगुरुं श्रियः पतिमपि प्राचार्थपारम्परीम ।
तुर्यं व्यूहमशेषहेतुमजितस्याचिन्त्यमुत्सङ्गजं
देवर्षिप्रवरं पराशरसुतं व्यासं च वैयासकिम् ॥

श्रीशैलपूर्णादखिलेतिहासपुराणजालं समवाप्य येन ।
प्रावर्ति सन्दर्शयतेव शिष्यभावं मुनिं लक्ष्मणमाश्रयेऽहम् ॥

श्रीरामानुजयोगिपूर्णकरुणापात्रं महान्तं ततः
संप्राप्ताखिलवेदविद्यमखिलान् यो द्रामिडान् व्याकरोत् ।
वेदान्तान् कुरुकेश्वरं गुणनिधिं श्रीविष्णुचित्तं गुरुं
वात्स्यं तं वरदं च वाग्विजयिनं व्यासार्यमीडीमहि ॥

श्रीमद्भागवतं पुराणमखिलं व्याख्यायि व्याख्यातृभिः
व्यासाद्यैर्यतिराजभाष्यवचसामर्हैं बुधानां मुदे ।
मन्दानामपि मादृशामवगमायाहं तदादर्शितं
पन्थानं समुपाश्रितो विवृणुयां मत्साहसं क्षम्यताम् ॥

तत्रभगवान् पाराशर्यस्सत्यवत्यां भगवदंशेनावतीर्णो बादरायणोऽखिलहेयप्रत्यनीककल्याणगुणगणेन परेण ब्रह्मणा विरचितेऽस्मिन् ब्रह्मादिस्तम्बपर्यन्ते देवमनुष्यपशुपादपस्त्रीपुंसचातुर्वर्ण्यचातुराश्रम्यादिभेदभिन्ने जगति

* * * *

भगवता जैमिनिना महर्षिणा पूर्वभागं व्याख्याप्य, स्वयमुत्तरभागं समीचीनैः शारीरकनयैर्व्याख्याय, प्रायशः पूर्वभागोपबृंहणात्मकं पञ्चमवेदत्वेन प्रसिद्धं श्रीमहाभारताख्यमितिहासं निर्माय, प्राधान्येन वेदान्तार्थोपबृंहणात्मकं श्रीमद्भागवताख्यं पुराणरत्नं चिकीर्षुस्तावदिष्टदेवतोपासनात्मकं मङ्गलमाचरति प्रथमश्लोकेन — जन्मादीत्यादिना । यद्यपि केचिदिदं पुराणं शुककर्तृकमिति वदन्ति । यद्यपि च यः उपनिषद्भागोपबृंहणपरेषु तत्रापि सात्त्विक-

तया प्रत्यक्षश्रुत्यनुगुणार्थतया च प्रबलेषु प्रबन्धेषु वासिष्ठपौत्र-प्रत्यक्षश्रुत्यभीष्टतमपञ्चमश्रुतिप्रवर्तकभगवद्वंशपाराशर्यतनयपरमर्षिप्रणीतं पुराणं श्रीभागवतमशेषजगत्प्रथितं परमनिःश्रेयसाभ्यर्थिभिरत्यन्तमुपादेयम् । यथा पाद्मे पुराणे अम्बरीषं प्रति गौतमेनोक्तम्——

अम्बरीष शुकप्रोक्तं शृणु भागवतं सदा । पठस्व स्वमुखेनापि यदीच्छसि भवक्षयम् ॥ इति श्रीव्यासार्यश्रीसूक्तेश्च शुककर्तृकत्वमवगम्यते ।

End:

एवमिति । इदं राज्ञा भाषितं । अहो · · · · · · · त्यादिना उक्तः पृष्टः अतः पृच्छामि संसिद्धिमित्यादिना पृष्टश्च, स भगवान् धर्मज्ञः । मुमुक्षूणां मुमूर्षूणाम् । कर्तव्यधर्मयाथात्म्याभिज्ञो बादरायणिः शुकः । श्लक्ष्णया विशुद्धया मृद्व्या वा, गिरा, प्रत्यभाषत प्रश्नानामुत्तराण्युवाचेत्यर्थः ।

Colophon:

श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोस्सुतेन तच्चरणकमलपरिचर्याप्रसन्नतत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णवदासेन श्रीवीरराघवविदुषा विरचितायां श्रीमद्भागवतचन्द्रिकायां श्रीमद्भागवतव्याख्यायां प्रथमस्कन्धे एकोनविंशोऽध्यायः ।

No. 16091. मध्वतन्त्रमुखमर्दनव्याख्या— व्यध्वविध्वंसनम् ·
MADHVATANTRAMUKHAMARDANAVYĀKHYĀ : VYADHVAVIDHVAMSANAM.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 78. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Same work as that described under No. 4704 ante.

By Appayadīkṣita.

Contains the first Adhikaraṇadūṣaṇa complete.

No. 16092· लघुधर्मप्रकाशिका.
LAGHUDHARMAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 5 × 2 inches. Pages, 227. Lines, 9 on a page. Character, Malayālam. Condition, good. Appearance, new.

Purports to be an abridgment, by Śaṅkara, in an easy style, of the voluminous work on Dharma Śāstra composed by Bhārgava.

Breaks off in the 4th Pāda of the 12th Adhyāya.

Beginning :

नत्वा धर्मविदो देवानृषींश्च परमं महत् ।
साम्बं शिवमनुस्मृत्य शङ्करेण मयात्मना ॥
आलोक्य भार्गवप्राप्तं धर्मशास्त्रमितस्ततः ।
विस्तरेण विषीदत्सु कृपया मन्दबुद्धिषु ॥
प्रायस्तदेव संक्षिप्य क्रियते मृदुभिः पदैः ।
अल्पाक्षरैरनल्पार्थैः पृथगेतन्निबन्धनम् ॥
वर्णानामाश्रमाणां च धर्मे दीप इवापरः ।
अनवद्यं सतां नाम लघुधर्मप्रकाशिका ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति स्वयम्भुवः ।
चत्वारो मुखबाहूरुपद्भ्यो वर्णाः पुराऽभवन् ॥

*　　　*　　　*　　　*

Colophon :

इति शाङ्करे धर्मशास्त्रे लघुप्रकाशिकानाम्नि प्रथमाध्यायस्य प्रथमः पादः ।

End :

Colophon :

इति शाङ्करे धर्मशास्त्रे द्वादशाध्यायस्य तृतीयः पादः ।

अथातोऽनुप्रवक्ष्यामि नृणां केरलवासिनाम् ।
अनाचारान् समासेन भार्गवेन प्रदर्शितान् ॥
अन्यत्राचरणाभावादनाचारान् भृगूद्वहः ।
यानाचष्ट चतुःषष्टिमथाख्यास्ये कृतानपि ॥

*　　　*　　　*　　　*

ऊर्ध्वत्रिपुण्ड्रं . . . कुर्याच्छुद्धेन भस्मना ।
सर्वेषां कर्मणां मन्त्रं स्वयमेवाचरेत् द्विजः ॥
अन्नं पर्युषितप्रायं व्यञ्जनं च तथाविधम् ।
शिशूच्छिष्टं च नैवेद्यं शिवस्य च विवर्जयेत् ॥

No. **16093.** नामलिङ्गानुशासनम्.
NĀMALIṄGĀNUŚĀSANAM.

Substance, palm-leaf. Size, 14 × 1, 1/16 inches. Pages, 212. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Same work as that described under No. 1622 ante.

By Amarasiṁha.

Complete. Printed.

No. **16094.** शक्तिवादः.
ŚAKTIVĀDAḤ.

Substance, palm-leaf. Size, 18 × 1⅛ inches. Pages, 76. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Tattvacintāmaṇi 39*a*.

Same work as that described under No. 4302 ante.

By Gadādhara. Printed.

No. **16095.** तत्त्वचिन्तामणिः.
TATTVACINTĀMAṆIḤ.

Pages, 108. Lines, 9 on a page.

Begins on fol. 39*a* of the MS. described under the last No.

Same work as that described under No. 3992 ante.

Gaṅgēśōpādhyāya.

Incomplete. Printed.

No. **16096.** सिद्धान्तचन्द्रिकाव्याख्या.
SIDDHĀNTACANDRIKĀVYĀKHYĀ.

Substance, palm-leaf. Size, 15½ × 1 inches. Pages, 124 Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Same work as that described under No. 4332 ante.

By Gaṅgādhara.

Incomplete.

No. **16097.** दिनकरीयव्याख्या — तरङ्गिणी.
DINAKARĪYAVYĀKHYĀ : TARAṄGIṆĪ.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 152. Lines, 8 on a page. Character, Grantha. Condition, injured Appearance, old.

Same work as that described under No. 3965 ante

By Rāmarudra.
Breaks off in the Anumānakhaṇḍa Printed.

No. 16098. जैनसन्ध्यावन्दनप्रयोगः.
JAINASANDHYĀVANDANAPRAYŌGAḤ.

Substance, palm-leaf. Size, 19 × 2 inches. Pages, 52. Lines, 7 on a page. Character, Kanarese. Condition, injured. Appearance, old.

A directory for the Sandhyā worship of the Jainas

Incomplete

Beginning:

